**उपायन** न० उपायते समीपे उपस्थीयते उप+अय-ल्युट् । १उपढौकने ( भेटदेओया )"तस्योपायनयोग्यानि रत्नानि सरितां पतिः" कुमा० कर्म्मणिल्युट् । २उपढौकनीये "परस्परेण विज्ञातस्तेषूपायनपाणिषु" रघुः "साधिवेशम निह्नितैरुपायनैः" माघः "प्रतीच्छन्नुपायनानि" काद० । भावे ल्युट् । ३उपगमने "उपायन उषसा गोमतीनाम्" ऋ० २,२८,२, "उपायने उपगमने" भा० । "सहोपायनकीर्त्त्या उवास" छा०उ०"उपायनकीर्त्त्या उपगमनकीर्त्तनमात्रेण" शा०भा० ।

**उपायिन्** त्रि० उपायोऽस्त्यस्य इनि । १साधनयुक्ते । उप+इण-णिनि । २उपगन्तरि । "सर्व्वान् वोत्तमेनोपायित्वात्" कात्या०३,३,८, "पञ्चमसुत्कृष्टं सर्व्वे उपयन्ति उपगच्छन्ति" कर्कः । "स्वस्थानान्त्येन वोपायित्वात्" कात्या०३,५,१६,एकोऽधः प्राकृशायो मध्वाश्यृतुजायोपायी कात्या० ५,२,२,१, कृतुकालएव सवर्णोपायी" कात्या० १८,६,२७, । उभयतः स्त्रियां ङीप् ।

**उपायु** त्रि०उप+इण्-उण् । उपगन्तरि । "तस्मादाह वायवः स्थेति उपायवःस्थेत्वेकेक आहुरुप हि द्वितीयोऽयतीति" शत० ब्रा०१,७,१,२,

**उपार** पु० उप+ऋ-गतौ कर्म्मणि घञ् । उपागते १समीपे । "अस्ति ज्यायान् कनीयस उपारे" ऋ० ७,८६,३, "उपारे उपागते समीपे" भा० ।

**उपारण** पु०उपेत्य न रमणं यत्र पृषो० । उपेतस्यारतिस्थाने "शुषु वा सदुपारणे" ऋ०८,३२,२१, उपारणे ब्राह्मणा उपेत्य यस्मिन् देशे न रमन्ते स उपारणः" भा० ।

**उपारत** त्रि० उप+आ+रम-क्त । १प्रतिनिवृत्ते"उपारताः पश्चिमरात्रिगोचरात्" किरा० ।

**उपारम्भ** उप+आ+रभ-घञ् मुम् । प्रारम्भे "सर्व्वकर्म्मोपारम्भे विनियोगः" सन्ध्यापद्धतिः

**उपार्ज्जन** न० उप+अर्ज्जि-ल्युट् । स्वत्वसम्पादकव्यापारभेदे स च अर्ज्जनशब्दे ३६५ पृ० दर्शितः "शस्त्राणां सरथानाञ्च कृत्वा सम्यगुपार्ज्जनम्" रामा० । ण्वुल् । उपार्ज्जक तत्कर्त्तरि त्रि० ।

**उपालब्ध** त्रि० उप+आ+लभ-क्त । तिरस्कारेण निन्दिते

**उपालम्भ** पु०उप+आ-लभ-घञ् मुम् च । निन्दापूर्व्वकतिरस्कारे। ल्युट्। उपालम्भन तत्रार्थे न० । कर्म्मणि ण्यत् । उपालम्भ्य हिंसनीये । "सौर्यः पशुरुपालम्भ्यः सवनीयस्य" लाट्या०सू० । तिरस्कार्य्ये तु न मुम् । उपलभ्य इत्येव ।

**उपावर्त्तन** न० उप+आ+वृत-ल्युट् । १पुनरागमने प्रत्यावृत्तौ । "तदुपावर्त्तनशङ्कि मे मनः" रघुः । २भूमौ लुठने च ।

**उपावृत्त** त्रि० उप+आ+वृत-क्त । १श्रमापनयनाय पुनःपुनःभूमिलुठितेऽश्वे, २प्रतिनिवृत्ते च । "उपावृत्तस्य पाप्मेभ्योऽस्य वासो गुणैः सह" ए०त० भविष्यपुराणम् ।

**उपावृत्** स्त्री उप+आ-वृत-क्विप् । १आवर्त्तिनां समीपे आवृत्तौ । "शतं ते सन्त्वावृतः सहस्रं त उपावृतः" यजु० १२,८ । "स्वस्यैवावर्त्तनमावृत् तत्समीपवर्त्तिनामावर्त्तनमुपावृत्" वेददी० । २निवृत्तौ च । उप+आ+वृत-क्तिन् । उपावृत्तिरप्यत्र स्त्री

**उपाश्रम** पु० उपमितमाश्रमेण अवा०स० । १आश्रमसदृशे पाशुपतादिदीक्षादौ । "उपाश्रमानप्यपरान् पाषण्डान् विविधानपि" भा०शा०३५अ० । "उपाश्रमान् पाशुपतपाञ्चरात्राद्युक्त दीक्षायोगान्" नीलक० । सामीप्ये अव्य० । २आश्रमसमीपे अव्य० ।

**उपाश्रय** पु०उप+आ+श्रि-पचाद्यच् । १ आश्रयकर्त्तरि "ब्राह्मणोपाश्रयो नित्यमुत्कृष्टां जातिमश्नुते" मनुः कर्म्मणि अच् । २आश्रणीये "राजर्षीणां हि सर्वेषामन्ते वनमुपाश्रयः" भा०आश्र०४अ० । "त्वं हि नस्तात ! सर्वेषां दुःखितानामुपाश्रयः" भा०व० ६११ अ० । भावे अच् । ३आश्रये ।

**उपाश्रित** त्रि० उप+आ+श्रि-कर्म्मणि क्त । यस्याश्रयो गृहीतस्तस्मिन् "तथैवोपाश्रिता देवी बुद्धिर्बुद्धिमतांवर !" भा०शा०४५अ० उपश्रितेति पाठान्तरम् । कर्त्तरि क्त । २कृताश्रये त्रि० ।

**उपासक** त्रि०उप+आस-ण्वुल् । १सेवके २उपासनाकर्त्तरि "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना" वेदा० । ३शूद्रे पुंस्त्री तस्य द्विजसेवकत्वात् तथात्वम् स्त्रियां जातित्वात् ङीष् । हेमचन्द्रोक्ते ४वाक्यदशाभेदे यथा वाक्यमुपक्रम्य "आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवायभुक् । पञ्चमं भगवत्यङ्गं ज्ञाता धर्म्मकथापि च । उपासकान्तकृदनुत्तरोपपातिका दशाः । प्रश्नव्याकरणञ्चैव विपाकश्रुतमेव च । इत्येकादश सोपाङ्गान्यङ्गानि द्वादश पुनः" इति । उपासनञ्च चिन्तनापरपर्य्यायमननात्मिका मानसी क्रिया । सा च क्वचिद्गुणादिकमारोप्य प्रवर्त्तते यथा निर्गुणे ब्रह्मणि सगुणत्वाद्यारोपेण प्रायुक्तवचने निर्गुणस्य ब्रह्मणो रूपारोपेणैव उपासनोक्ता; अतएव "सर्वं खल्विदं ब्रह्म तज्जलान् इति